# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

कक्षा - शास्त्री-२ ( **Sem_4** ) प्रश्नपत्र-४ गुणाः - ७०

विषयः ज्योतिषशास्त्रम् OE 2.4.4 समयः - ०३:०० तः ०६:००

दिनाङ्कः - २१-०४-२०१६ सन्दर्भग्रन्थः - जातकालङ्कारः, चमत्कारचिन्तामणिः, केशवीयजातकपद्धतिः

---

**प्रश्नः -१ अधोलिखितेषु द्वयोः संप्रसङ्ग व्याख्या कार्या ।** **०८**

*१. लग्नस्थे रौहिणेये तदनु रविशनी कूरदृष्टौ रिपुस्था*
*वेकर्क्षे चैकभागे भवति गतिमतिर्दृष्टिहीनौ शुभानाम् ।*
*तिग्मांशौ वैरिनाथे खलविहगयुते तुर्यगे सूर्यसूनौ*
*ह्रद्रोगी वाक्यतौ वा भवति ह्रदि नरः कृष्णपित्ती सकम्पः ॥*

*२. प्रालेयांशोः सिताद्वा दिनमणितनयस्तत्पूरोभागवर्ती*
*भूतौ चेच्चन्द्रशुक्रौ यदि तरणिसूतं पश्यतश्चायशाः स्यात् ।*
*शेफच्छेदो नाराणामथ तपनसुते भूमि केन्द्रेऽर्कयुक्ते*
*दृष्टे काव्योडुपाभ्यां यदि दिवसपतेश्चोपरागोऽत्र तद्वत् ॥*

*३. वागीशे वीर्ययुक्ते नवमभवनगाः देर्वखेटाः शतायुः*
*कर्केऽङ्गे जीवचन्द्रौ सहजरिपुभवे सत्कविज्ञौ च केन्द्रे ।*
*केन्द्रे सूर्यारमन्दा गुरुनवलवगा वाक्पतौ लग्नयाते*
*व्यष्टस्थानेषु शेषाः शरगजतुलितं स्यान्नराणां तदाऽऽयुः ॥*

**प्रश्नः -२ अधोलिखितयोः कस्यचिदेकस्य उपरि निबन्धं लिखतु ।** **०८**

*१. मनुष्यस्वभावबोधकयोगानां वर्णनं कुरुत ।*

*२. आयुर्दायस्य वैशिष्ट्यं विलिख्य दीर्घायुर्योगवर्णनं कुरुत ।*

**प्रश्नः -३ निम्नङ्कितेषु टिप्पणी द्वयं लिखत ।** **०४**

*१. मितभाष्यादियोगाः । २. अङ्गविकारयोगाः । ३. पूर्णायुर्योगाः । ४.परमायुर्योगाः ।*

**प्रश्नः -४ अधोनिर्दिष्टेषु पञ्चानां अतिलघूत्तरं यच्छत ।** **०५**

*१. नरः कदा दुर्बलो भवति ?*

*२. कृष्णकुष्ठरोगः कदा भवति ?*

*३. धरणिसुतः निजर्क्षसन् लग्नं पश्येत्तदा किं फलम् ?*

*४. क्षोणीपुत्रशब्दस्यार्थः कः?*

*५. षष्ठिरायुर्योगः कदा भवति ?*

*६. लग्नाधीशाष्टनाथौ लयभवनगतौ चेत्तदा कति वर्षपर्यन्तायुर्भवति ?*

*७. जातकालङ्कारस्य पञ्चमेऽध्याये कति श्लोकाः सन्ति ?*

**विभागः-२**

**प्रश्नः -५ अधोलिखितेषु द्वयोः संप्रसङ्ग व्याख्या कार्या ।** **०८**

*१ धने यस्य भानुः स भाग्याधिकः स्याच्चतुष्पात्सुखं सद्व्यये स्वं च याति ।*
*कुटुम्बे कलिर्जायया जायतेऽपि क्रिया निष्फला याति लाभस्य हेतोः ॥*

२ सुपुत्रेऽपि किं यस्य शुको न पुत्रे प्रयासेन किं यत्न सम्पादितार्थः।
व्युदर्कं विना मन्त्र मिष्टासनाभ्या मधीतेन किं चेत्कवित्वे न शक्तिः ॥

३ मनीषी कृतं न त्यजेद्बन्धुवर्गः सदा पालयेत्पूजितः स्याद् गुणैः स्वैः।
सभा द्योतको यस्य चेत्रित्रिकोणे तमः कौतुकी देवतीर्थे दयालुः ॥

**प्रश्नः -६ अधोलिखितयोः कस्यचिदेकस्य विवेचनं कुरुत। ०८**

१ ग्रन्थोक्त दिशा दशमभावस्थित चन्द्रफलवर्णनम्।

२ बृहस्पतेः लग्नभावस्थफलवर्णनं क्रियताम्।

**प्रश्नः -७ अधोलिखितयोः टिप्पणी द्वयं लिखत। ०४**

१. पञ्चमस्थसूर्यफलम्। २. षष्ठस्थशनिफलम्। ३. तृतीयस्थराहुफलम्। ४.सप्तमस्थकेतुफलम्।

**प्रश्नः -८ अधोलिखितेषु पञ्चानाम् अतिलघूत्तरं लिखत। ०५**

१ भास्करस्य कस्मिन् स्थाने स्थितिः रिपुध्वंशकृद् भवति ?

२ पञ्चमस्थाने नक्षत्रनाथे स्थिते कि फलम् ?
३ बुधः धर्मगे चेत् किं फलम् ?

४ जातकः कदा चारुभाषि भवति ?
५ कुसीद शब्दस्यार्थः कः ?

६ जनः कदा वैकुण्ठगन्ता भविष्यति ?
७ प्रयञ्चाधिको लाभगे भानुपुत्रे, इति वाक्यस्यार्थः कः ?

**विभागः -३**

**प्रश्नः -९ अधोलिखित द्वयोः सन्दर्भ व्याख्यां लिखत। ०८**

१ रात्रेः शेषमितं युतं दिनदलेनाह्नो गतं शेषकं
विश्लेषष्यं खलु पूर्वपश्चिमनतं त्रिंशच्चयुतं चोन्नतम्।
यत्पूर्वोन्नतषड्भयुक्तरवितः पश्चान्नता दित्यतो
यल्लङ्कोदयकैश्च लग्नमिव तन्माद्यं सषड्भं सुखम् ॥

२ खैकाग्निद्विखवेदरामयमभूखाभ्रामेकादिभे
द्रेष्ट्रावर्जितदृश्यकस्य गुरुणा चेदष्टवेदे कृताः।
मन्देनाङ्कयमेऽसृजा नगगुणेऽङ्का भादिजाः संस्कृता
भागघ्नक्षयवृद्धिखानललवेनाब्ध्युद्धृता दृगभवेत् ॥

३ नीचोनो भगणाच्चयुतः षडधिकश्चेत्षड् ह्यदौच्चं बलं
स्वर्क्षेऽर्धं समभेऽष्टमस्त्रिचरणा मूलत्रिकोणे बलम्।
मित्रर्क्षेऽङ्घ्रिरधीष्टभे त्रय इभांशा वैरिभेऽष्ट्यंशको
दन्तांशोऽध्यरिभे गृहादिपवशात्खेटस्य सप्तैक्यजम् ॥

**प्रश्नः -१० अधोलिखितयोः कस्यचिदेकस्य निबन्धं निबन्धयत। ०८**

१ चरान्तरसाधनविधेः वर्णनं कुरुत।
२ चन्द्रस्पष्टसाधनविधिः सोदाहरणं ग्रन्थोक्तदिशा कुरुत।

**प्रश्नः -११ अधोलिखितयोः कस्यचिदेकस्य उपरि टिप्पणीं लिखत। ०२**

१ भयात-भभोगसाधनम्
२ दृष्टिसाधनविधिः

**प्रश्नः -१२ अधोलिखितेषु कयोश्चिद् द्वयोः अतिलघूत्तरं लिखतु। ०२**

१ जातकपद्धतेः रचयितुर्नाम किम् ?
२ वेलान्तरस्योपयोगः कदा भवति ?

३ पञ्चमभावस्य का संज्ञा ?
४ खेटस्य सप्तैक्यजं बलं कदा ग्राह्यम् ?

---------------------------